**अनुजात** त्रि॰ अनु+जन—क्त । पश्चाज्जातमात्रे, “दन्तजातेऽनुजाते च कृतचूडे च संस्थिते” इति मनुः । अनुजाते दन्तजन्मानन्तरं संस्थित इति” कुल्लू॰ “भ्रातस्तवानुजाताऽहं भुङ्क्ष्व भक्तमिदं शुभम्” इति स्मृतिः । “असौ कुमारस्तमजोनुजात” इति रघुः । अनन्तरजातत्वात् पुत्त्रस्य तथात्वम् ।

**अनुजावर** त्रि॰ अनुजादप्यवरः । अत्यन्तनिकृष्टे । “एतास्मैवानुजावराय कुर्य्यादिति” ता॰ब्रा॰ । अनु पश्चाज्जायते इत्यनुजः कनीयान् सहि निकृष्टः तस्मादप्यवरो निकृष्ट इति भा॰ वेदे न स्त्वभावः लोके तु अनुजावरस्त्वै ।

**अनुजीविन्** त्रि॰ अनुजीवितुमाश्रयितुं शीलमस्य अनु+जीव-णिनि । सेवके, आश्रिते च । [णीये सेव्ये ।

**अनुजीव्य** त्रि॰ अनुजीव्यतेऽसौ अनु+जीव—ण्यत् । आश्र-

**अनुज्ञा** स्त्री अनु+ज्ञा—अङ् । स्वयंप्रवृत्तस्यान्यस्य प्रवृत्त्यविघातकरणेन प्रवर्त्तनारूपायामनुमतौ । “गुरोरनुज्ञामधिगम्य मातः” ! इति रघुः । “तद्वा एतदनुज्ञाक्षरं यद्धि-किञ्चानुजानात्योमित्येव तदाहेति” श्रुतिः ।

**अनुज्ञात** त्रि॰ अनु+ज्ञा—क्त । कृतानुज्ञे यस्मै करणायानुज्ञा कृता तस्मिन् जने ।

**अनुज्येष्ठ** त्रि॰ अनुगतो ज्येष्ठम् प्रा॰स॰ । ज्येष्ठानुगते । ज्येष्ठमनतिक्रम्य याथार्थ्ये अव्ययी॰ । ज्येष्ठानुरूपे ज्येष्ठानतिक्रमे च अव्य॰ । [रार्थं देये शुल्कादौ, आतरे ।

**अनुतर** न॰ अनुतीर्य्यतेऽनेन अनु—तॄ—करणे अप् । नदीपा-

**अनुतर्ष** न॰ अनुतृष्यतेऽनेनेदं वा करणे कर्म्मणि वा घञ् । सुरापानपात्रे, मद्ये च । भावे घञ् । मद्यपाने, अभिलाषे, पानेच्छायाञ्च । “सोपचारमुपशान्तविचारं सानुतर्षमनुतर्षपदेनेति” माघः ।

**अनुताप** पु॰ अनु+तप—घञ् । इदमनुचितं कृतमिति स्वकृतवस्तुनो दुःखजनकतया ज्ञानेन पश्चात्तापे । “ख्यापनेनानुतापेन” इति” मनुः । “तस्याः करिष्यामि दृढानुतापमिति” कुमा॰ ।

**अनुतिल** त्रि॰ अनुगतस्तिलम् अत्या॰स॰ । तिलानुगते क्षेत्रादौ, तिले विभक्त्यर्थे अव्ययी॰ तत्र भवः परिमुखादि॰ ञ्य । आनुतिल्यः तिलभवे त्रि॰ ।

**अनुतूलन** न॰ तूलेनानुकुष्णाति तृणाद्यम् तूलेनानुवर्त्तयति अनु+तूल+अनुकोषणे णिच्—भावे ल्युट् । तूलेन तृणाद्यादेरनुघट्टने ।

**अनुत्क** त्रि॰ न॰त॰ । उत्कण्ठितभिन्ने स्वस्थे ।

**अनुत्कर्ष** पु॰ न उत्कर्षः अभावे न॰त॰ । उत्कर्षाभावे ब॰ । उत्कर्षशून्ये त्रि॰ ।

**अनुत्त** त्रि॰ न+ उन्द्—क्त नसत्तनिषत्तानुत्तेत्यादिना नि॰ । अक्लिन्ने “इन्द्र ! तुभ्यमिदद्रिवोऽनुत्तमिति” ऋ॰ १,८०,७, नुद—क्त न॰त॰ । अनुन्ने अप्रेरिते । “अनुत्तमाते मघवन्निति” ऋ॰ १,१६५,९, ‘अनुत्तमप्रेरितमिति” भा॰ ।

**अनुत्तम** न॰ न उत्तमोयस्मात् । अत्युत्कृष्टे । “काङ्क्षन् गतिमनुत्तमामिति,” “इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखमिति” “यशोऽस्मिन् लोके प्राप्नोति प्रेत्य चानुत्तमं सुखमिति” च मनुः ।

**अनुत्तर** त्रि॰ उत्तरउत्तमः न॰ ५ब॰ । अत्यन्तश्रेष्ठे । ६ब॰ । उत्तरवाक्यरहिते “भवत्यवज्ञा च भवत्यनुत्तरादिति” नैष॰ । न॰त॰ । उत्तरदिग्भिन्नायां तद्विरोधिन्यां दक्षिणस्यां दिशि, स्त्री । उत्तमभिन्ने अपकृष्टे त्रि॰ । न उत्तरति चलति उद्+तॄ—अच् न॰त॰ । स्थिरे त्रि॰ ।

**अनुत्तान** त्रि॰ न उत्तानः विरोधे न॰त॰ । उत्तानभिन्ने अवताने अवाङ्मुखे ।

**अनुत्तरङ्ग** त्रि॰ उद्गतस्तरङ्गो वीचिश्चाञ्चल्यं वा यस्मात् प्रा॰ ब॰न॰त॰ । अनुद्गततरङ्गे अचञ्चले च “अपामिवाधारमनुत्तरङ्गमिति” कुमा॰ शिवपक्षे अचञ्चलमित्यर्थः ।

**अनुत्पत्ति** स्त्री न उत्पत्तिः अभावे न॰त॰ । उत्पत्त्यभावे “क्षयं केचिदुपात्तस्य दुरितस्य प्रचक्षते । अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते” स्मृतिः ।

**अनुत्पत्तिक** त्रि॰ नास्ति उत्पत्तिर्यस्य कप् । उत्पादशून्ये ।

**अनुत्पन्न** त्रि॰ न उत्पन्न न॰त॰ । उत्पन्नभिन्ने अजन्ये ।

**अनुत्पाद** पु॰ न उत्पाद उत्पत्तिः अभावार्थे न॰त॰ । उत्पत्त्यभावे । ब॰ । उत्पत्तिशून्ये त्रि॰ ।

**अनुत्साद** पु॰ न उत्सादः अवसादनम् भावे न॰त॰ । अवसादाभावे उच्छेदाभावे । न॰ब॰ । उच्छेदशून्ये त्रि॰ ।

**अनुत्साह** पु॰ न उत्साहः अभावे न॰त॰ । उत्साहाभावे ब॰ । उत्साहशून्ये त्रि॰ ।

**अनुत्सिक्त** त्रि॰ न उत्सिक्तः गर्वितः । अगर्विते गर्वशून्ये ।

**अनुत्सुक** त्रि॰ न॰त॰ । उत्सुक—भिन्ने उत्कण्ठाशून्ये ।

**अनुत्सूत्र** त्रि॰ उत्क्रान्तः सूत्रम् अत्या॰स॰ न॰त॰ । सूत्रानुगते “अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धनेति” माघः । सूत्रं पाणिनीयसूत्रं नीतिशास्त्रञ्चेति विवेकः ।

**अनुद** त्रि॰ न नुदति नुद—क न॰त॰ । प्रेरकभिन्ने अनुददाति तुल्यं ददाति अनु+दा क । तुल्यरूपदातरि,